हिमसंस्कृतवार्ताः

दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८२,
कलियुगाब्धः ५१२६ वसन्त-ऋतुः
सूर्यः उत्तरायणः वैशाखकृष्णचतुर्दशी
वैशाख 14 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-178 | 1 | अप्रैल 27, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचले अनुबन्धाधारित-नियुक्तिनिषेधः, अधिनियमस्य कार्यान्वयनानन्तरं सर्वकारस्य बृहत् निर्णयः

3 अमृतसरे दशदिवसीय-संस्कृतसम्भाषण-शिबिरकार्यशालायाः समापनम्

4 बिलासपुरस्य उद्यानपालकः हरिमनशर्मा देशस्य दिल्लीनगरे पद्मश्रीपुरस्कारं प्राप्स्यति

## सुभाषितम्

**निन्दितः स्तूयमानो वा,
विद्वानज्ञैर्न निन्दितः।
न स्तौति किन्तु तेषां स्याद्,
यथाबोधस्तथाचरेत्।।**

अर्थात्- विद्वान व्यक्ति अज्ञानी पुरुषों से निन्दा या स्तुति पाकर भी स्वयं न तो निन्दा करता है और न ही स्तुति। अपितु उनको जैसा ज्ञान प्राप्त हो वैसा ही आचरण करता है।

## आतंकवादः वैश्विकशांतये बृहत्तमं भर्त्सनं वर्तते- संयुक्तराष्ट्रसंघः



हिमसंस्कृतवार्ताः - संयुक्तराष्ट्रसंघस्य सुरक्षापरिषदः जम्मू-कश्मीरस्य पहलगाम नगरे भयोत्पादक-आक्रमणस्य दृढ़तया निन्दा कृता। परिषदः सदस्याः अवोचन् यत् आतंकवादः वैश्विकशांतये बृहत्तमं भर्त्सनं वर्तते। एतदर्थं अस्य सर्वविधः विरोधः करणीयः एवा परिषदः पहलगाम-आक्रमणे ये अपराधिनः सन्तिः ये समर्थकाः सन्ति अपि च ये प्रयोजकाः सन्ति सर्वेऽपि दण्डनीयाः इति आह्वानं कृतम्।

## पोप-फ्रांसिस्-इत्येतस्य अन्त्येष्टि-संस्कारः वैटिकन नगरस्य सेण्ट्-पीटर- स्वायर इत्यत्र अभवत्



हिमसंस्कृतवार्ताः - पोप-फ्रांसिस्-इत्येतस्य अन्त्येष्टि-संस्कारः वैटिकन नगरस्य सेण्ट्-पीटर- स्वायर इत्यत्र अभवत्, यत्र विश्वस्य नेतारः, गणमान्यजनाः, सहस्रं यावत् श्रद्धालवः च उपस्थिताः आसन् वैश्विकरोमनकैथोलिकचर्च इत्यस्य प्रमुखस्य अन्त्येष्टिः रोमनगरस्य सेण्ट् मेरी मेजर इत्यस्य बेसिलिकायां अभवत्। अन्त्येष्टि-संस्कारस्य आरम्भः भारतीयमानकसमयानुसारी अपराह्ने साधक वादने अभवत्। अस्मिन् समारोहे एक-दशमलव-पञ्च-लक्षाधिकाः जनाः उपस्थिताः सन्ति। राष्ट्रपतिः, प्रधानमन्त्री, राज्ञः परिवारः, धार्मिकनेतारः च पोप-फ्रांसिस्-वर्याय अन्तिम-श्रद्धांजलिम् अर्पयितुं एकत्रिताः सन्ति। राष्ट्रपतिः द्रौपदी मुर्मूः भारतस्य सर्वकारस्य, जनानां प्रतिनिधी रूपेण श्रद्धाञ्जलिम् अर्पितवति ।

## प्रधानमन्त्री नरेन्द्रमोदी दृश्य-श्रव्य परान्तर्जालीय-माध्यमेन विविधेषु सर्वकारीयविभागेषु संघटनेषु च नवनियुक्तेभ्यः युवभ्यः एकपंचाशत्सहस्राणि नियुक्तिपत्राणि वितरितवान्



हिमसंस्कृतवार्ताः - प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् यदा युवकाः राष्ट्रनिर्माणं कुर्वन्ति तदा भवति राष्ट्रस्य द्रुतगत्या विकासः अपि च विश्वस्मिन् हि विश्वे स्वकीयं कीर्तिपताकां स्थापयति । सः अवोचत् यत् देशस्य युवकाः स्वस्य परिश्रमेन नवान्वेषणेन च देशस्य कियती क्षमता अस्ति इति विश्वं दर्शयन्ति । अवधेयमस्ति यत् प्रधानमन्त्री नरेन्द्रमोदी दृश्य-श्रव्य-परान्तर्जालीय माध्यमेन विविधेषु सर्वकारीयविभागेषु संघटनेषु च नवनियुक्तेभ्यः युवभ्यः एकपंचाशत्सहस्राणि नियुक्तिपत्राणि वितरितवान्। मोदी अवोचत् यत् ये युवकाः नियुक्तिपत्रं प्राप्तवन्तः तेषामुपरि देशस्य आर्थिकव्यवस्थां सुदृढां कर्तुं दायित्वम् अस्ति। देशे आधुनिकसंरचनायाः निर्माणस्य दायित्वम् अस्ति। मुम्बई-नगरे विश्व-दृश्य- श्रव्य मनोरञ्जन-शिखरसम्मेलनं वेव्स् इत्यस्य विषये अपि प्रधानमन्त्री अवदत् यत् देशस्य युवकाः अपि अस्य आयोजनस्य केन्द्रस्थाने सन्ति । मोदीवर्यः अवदत् यत्, देशस्य महिलाः प्रशासनिक, अन्तरिक्ष, विज्ञानक्षेत्रेषु च नूतनं औन्नत्यं प्राप्तवत्यः सन्ति। सम्प्रति सर्वकारः ग्रामीण-महिलानां सशक्तिकरणदिशि कटिबद्धः वर्तते। वृत्यवसर-सृजन-क्षमतायै सर्वोच्च प्राथमिकतां प्रदातुं प्रधानमन्त्रिणः प्रतिबद्धतानुरूपम् अयं हि पंचदशमः वृत्यवसर-मेलकः अशेषे हि देशे सप्तचत्वारिंशत्स्थानेषु आयोजितः।

## दक्षिण-ईरानस्य बन्दर-अब्बास-नगरे शाहिद-राजाई-पत्तने विशाल-विस्फोटे चतुःशततोप्यधिकाः जनाः व्रणिताः



हिमसंस्कृतवार्ताः - दक्षिण-ईरानस्य बन्दर-अब्बास-नगरे शाहिद-राजाई-पत्तने विशाल-विस्फोटे चतुःशततोप्यधिकाः जनाः व्रणिताः। स्थानीय-वार्ता-वाहिन्यानुसारं विस्फोटः शाहिद-राजाई-पत्तने संगृहीतेषु अनेकेषु कंटेनर इति संग्रहपात्रेषु अभवत्। ओमानदेशे इरान्-अमेरिका-देशयोः मध्ये परमाणुवार्तायाः तृतीयचक्रस्य आरम्भे एषः विस्फोटः अभवत् ।

## केन्द्रीयमन्त्रिणा हरदीपसिंहपुरिणा पञ्चविंशति-जनेभ्यः सर्वकारीयक्षेत्रेषु नियुक्तिपत्राणि वितरितानि



हिमसंस्कृतवार्ताः - केन्द्रीयमन्त्रिणा हरदीपसिंहपुरिणा उक्तं यत्, पहलगाम इव आतङ्कवादीनां आक्रमणं जीवनाधिकारस्य विरुद्धम् अस्ति, अस्याक्रमणस्य निन्दा भवेदेव। श्रीपुरीः मोहालीनगरस्य अमेटीविश्वविद्यालये पञ्चदशतमे वृत्यावसरमेलापके सम्मिल्य उक्तवान् यत्, इदम् आक्रमणं एतादृशेन देशेन अभवत् योहि आतङ्कवादस्य उपयोगं राज्यनीतेः साधनरूपेण करोति। तेन आश्वासितं यत् तस्य योग्यं उत्तरं प्रदास्यते । मन्त्रिणा पञ्चविंशति-जनेभ्यः सर्वकारीयक्षेत्रेषु नियुक्तिपत्राणि वितरितानि।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## अद्य एकादशवादने 'मन की बात' कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति।

हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी अद्य एकादशवादने स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। 'मन की बात' इत्यस्य मासिक-कार्यक्रमस्य इदम् एकविंशत्यधिकैकशततमं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाणी-दूरदर्शनयोः सर्वाभिः वाहिनीभिः भविष्यति। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अयं कार्यक्रमः क्षेत्रीय-भाषासु अपि प्रसारयिष्यते।

# हिमाचले अनुबन्धाधारितनियुक्तिनिषेधः, अधिनियमस्य कार्यान्वयनानन्तरं सर्वकारस्य बृहत् निर्णयः

**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशे अनुबन्धाधारितं सर्वकारीयकर्मचारिणां नियुक्तिः सम्भवतः स्थगिता। राज्यसर्वकारेण हिमाचलप्रदेश- सर्वकार- सेवक- नियुक्ति- सेवाधिनियमः २०२४ कार्यान्वितम् अस्ति। अस्मिन् विषये कार्मिकविभागेन अधिसूचना कृता। विभागस्यानुसारं २० फरवरी २०२५ तः अयं अधिनियमः प्रवर्तते एवं अनुबन्धाधारित- नियुक्तिविधिः न पुनः। अस्मिन् विषये रिक्तस्थानानाम् आवश्यकता, चयनप्रक्रिया, नियुक्तिप्रस्तावस्य प्रसारणकरणम् इत्यादयः विषयाः विभिन्नेषु चरणेषु सन्ति, वर्तमानकाले नूतनविधानस्य आलोके तेषां परीक्षणं क्रियते। कार्मिकविभागेन निर्गतायाम् अधिसूचनायां सर्वेषां प्रशासनिकसचिवानां, सर्वेषां विभागप्रमुखानां, डी. सी., बोर्ड-निगमानाम् अध्यक्षाः, प्रबन्धनिदेशकाः, लोकसेवा- उपक्रमानाम् रजिस्ट्रारः, राज्यलोकसेवा- आयोगस्य सचिवाः, राज्यचयन-आयोगः च नवीना नियुक्तिः दातुं पूर्वं सर्वकारीयनिर्देशानां प्रतीक्षां कर्तुम् अनुरोधः कृतः। एतेषां निर्देशानां कठोरपालनाय सर्वेषां सम्बन्धिनां समीपम् आनेतुम् अपि आग्रहः कृतः। अनुबन्धकर्मचारिणां नियमितीकरणादेशाः अपि अधिनियमानुसारं भविष्यन्ति। अन्यस्याम् अधिसूचनायां सर्वकारेण स्पष्टीकृतं यत् हिमाचलप्रदेश- सर्वकारसेवक (भर्ती तथा सेवाशर्ताः) अधिनियमः २०२४ पारितस्य अनन्तरं अनुबन्धकर्मचारिणां नियमितीकरणादेशाः अस्य अधिनियमस्य प्रावधानैः नियन्त्रिताः भविष्यन्ति। अस्याः नीतेः अन्तर्गतं नियमितीकरणार्थं अनुबन्धकर्मचारिणां प्रकरणानां विचारं कुर्वन्तः तेषां नियमितीकरणादेशे उपर्युक्तनियमः अपि निर्धारयन्तु। यत्र नियमितीकरणस्य आदेशाः निर्गताः सन्ति, तत्र नियमितीकरणं अस्य अधिनियमस्य प्रावधानानाम् अधीनम् इति योजयित्वा अधिसूचना तत्क्षणमेव निर्गन्तुं शक्यते। अतः पत्रं निर्गन्तुम् अभवत्। अखिलभारतीय- शैक्षिकसङ्घस्य पूर्वराज्यमहासचिवः डॉ. ममराजपुण्डीरः अवदत् यत् एतत् पत्रं निर्गन्तुम् अभवत् यतोहि शिक्षाविभागेन कार्मिकविभागं विधिविभागं च न पृष्ट्वा आयोगात् विद्यालयप्रवक्तृणां नियुक्तिः कृता, यदा तु अनुबन्धेन नियुक्तेः प्रावधानं नियमेषु नास्ति। अपेक्षा अस्ति यत् सर्वकारः शीघ्रमेव नूतननीतिं सूचयिष्यति। एतेन एव वर्तमाननियमानुसारं चयनितानाम् अभ्यर्थीनां कृते का प्रक्रिया अनुसृता इति ज्ञास्यते।

# केन्द्रीयराज्यमंत्री सतीशचन्द्रः दुबे शिमलायां ६१ युवभ्यः नियुक्तिपत्राणि समर्पितवान्



हिमसंस्कृतवार्ताः - शिमला। केन्द्रीयराज्यमंत्रीः सतीशचन्द्रः दुबे शिमलायां ६१ युवभ्यः नियुक्तिपत्राणि समर्पितवान्। राजधान्यां शिमलायां स्थितस्य केन्द्रीय-आलू-अनुसन्धान-संस्थानस्य बेमलोई-इत्यस्य सभागारे रोजगारमेला आयोजितम् । अस्मिन् मुख्यातिथिः सतीशचन्द्रः दुबे २५ नवनियुक्त- अभ्यर्थिभ्यः नियुक्तिपत्राणि वितरितवान् तथा संयुक्त-आयकरः आयुक्तः शिमला राजाघोषः अन्येभ्यः नवनियुक्तेभ्यः युवभ्यः नियुक्तिपत्राणि वितरितवान्। दुबे इत्यनेन उक्तं यत् एतावता राष्ट्रियस्तरस्य १५ रोजगारमेलाः आयोजिताः सन्ति। शनिवासरे देशे ४७ स्थानेषु राष्ट्रियमेलानां आयोजनं कृत्वा ५१ सहस्राधिकानां युनां कृते रोजगारपत्राणि वितरितानि। एतादृशानां आयोजनानां कृते मिशनमोड् इत्यत्र सर्वकारः कार्यं करोति । केन्द्रसर्वकारः निजीक्षेत्रे जीविकायाः अवसरान् प्रदातुं अपि कार्यं कुर्वन् अस्ति । लघु-बृहत्-सर्वप्रकारस्य उद्योगानां स्थापनायाः अपि सुविधाः सर्वकारः प्रदाति । स्वागतभाषणे आयकरस्य प्रधानायुक्तः जगजीवन गर्गः अवदत् यत् अस्य उपक्रमस्य अन्तर्गतं केन्द्रसर्वकारविभागेषु अपि च राज्यसर्वकारेषु/केन्द्रीयक्षेत्रेषु च नियुक्तयः क्रियन्ते। देशे सर्वत्र चयनितानां नवीनकर्मचारिणां वित्तमन्त्रालयः, श्रमरोजगारमन्त्रालयः, संचारमन्त्रालयः, शिक्षामन्त्रालयः, पर्यावरणं, वनजलवायुपरिवर्तनमन्त्रालयः, रेलमन्त्रालयः, विज्ञानप्रौद्योगिकीमन्त्रालयः, जलशक्तिमन्त्रालयः च समाविष्टाः सर्वकारस्य विभिन्नमन्त्रालयेषु/विभागेषु नियुक्ताः सन्ति।

# विरोधे सम्बद्धानां शिक्षकानां एकदिवसीयवेतनं न्यूनं भविष्यति, सर्वकारविरुद्धं वक्तव्ये च भविष्यति निलम्बनम्




शनिवासरे चौड़ामैदाने हिमाचलप्रदेश- प्राथमिकशिक्षकसङ्घेन प्रदर्शनं कृतम्। अस्मिन् काले बहवः प्राथमिकशिक्षकाः प्रदर्शने सम्मिलिताः भूत्वा स्वयाचनायाः समर्थने घोषान् उत्थापितवन्तः। अपरपक्षे प्रतिबन्धस्य अभावेऽपि विरोधप्रदर्शने भागं गृह्णन्तः शिक्षकाः कठोरकार्याणि कर्तुं सर्वकारेण निर्णयः कृतः। शिक्षासचिवेन निर्गतनिर्देशेषु विरोधे सम्बद्धानां शिक्षकानाम् एकदिवसीयवेतनं हृतं भविष्यति इति उक्तम् अस्ति। तदतिरिक्तं विरोधकाले सर्वकारस्य, तस्य नीतीनां, कार्यक्रमाणां च विरुद्धं वक्तव्यं दत्तवन्तः शिक्षकाः तत्क्षणमेव निलम्बिताः भविष्यन्ति, तेषां विरुद्धं कठोर- अनुशासनात्मक- कार्याणि अपि क्रियन्ते।
विद्यालयशिक्षानिदेशकं तादृशानां शिक्षकाणां परिचयं कर्तुं कथितम् अस्ति। शिक्षणकार्यं कर्तुं नाङ्गीकुर्वन्तं शिक्षकाः अकालं निवृत्ताः भविष्यन्ति इति सर्वकारेण कठोरनिर्देशाः दत्ताः। सर्वकारस्य मते एतत् अवलोकितं यत् संघस्य पदाधिकारिभिः शिक्षकैः च एकं वक्तव्यं दत्तं यत् ते किमपि ऑनलाइनकार्यं न करिष्यन्ति, ऑनलाइन- उपस्थितिं चिह्नं न करिष्यन्ति, एमडीएम-कार्यं न करिष्यन्ति इति, यत् सर्वकारस्य निर्देशानां प्रत्यक्षम् उल्लङ्घनम् अस्ति, तच्च गम्भीरतापूर्वकं गृहीतम् अस्ति। उपशिक्षानिदेशकान् एतादृशप्रकरणानां निरीक्षणं कर्तुं कथितम् अस्ति। ये शिक्षकाः एतानि कार्याणि कर्तुं नाङ्गीकुर्वन्ति तेषां अकालं निवृत्तिः दीयते। वदामः यत् शिक्षासचिवराकेशकंवरेन निर्गतपत्रे उक्तं यत् यदि शनिवासरे शिक्षकाः विरोधं कुर्वन्ति तर्हि दुराचारः इति गण्यते। सः योजनाकृतं आन्दोलनं गम्भीरं दुराचारं, केन्द्रीयसिविलसेवा (आचरण) नियमस्य, १९६४ इत्यस्य उल्लङ्घनं च इति अपि अवदत्। शिक्षासचिवस्य पक्षतः प्राथमिकशिक्षकसङ्घस्य अध्यक्षाय जगदीशशर्मा, महासचिवः संजयः च इत्येताभ्यां सूचना कृता। परन्तु तदपि शनिवासरे शिक्षकाः प्रदर्शनं कृतवन्तः। शिक्षकसङ्घः शिक्षानिदेशालयानाम् अद्यतन- प्रशासनिक- पुनर्गठनस्य विरोधं कुर्वन् अस्ति। अस्य विरोधे प्राथमिकशिक्षकसङ्घः प्रथमवारं चौड़ा मैदाने प्रदर्शनं कृतवान्। अधुना सर्वकारेण महती कार्यविधिः कृता अस्ति।

# दियोटसिद्धे पाकिस्तानविमान-सेवायाः वातगोलकं प्राप्तम्



हिमसंस्कृतवार्ताः- कार्यालयीय; प्रतिनिधिः।दियोटसिद्धपुलिसस्थानस्य अन्तर्गतं करनेहडाक्षेत्रे पाकिस्तानविमानसेवायाः वातगोलकं प्राप्तम्। वातगोलकस्य प्राप्तिसूचना पुलिसाय दत्तमात्रेण पुलिसैः वातगोलकं स्वनिग्रहे गृहीतम्। एतत् कथ्यते यत् क्षेत्रस्य जनाः एतत् वातगोलकं दृष्ट्वा ततः पुलिसं सूचितवन्तः। डीएसपी बड़सर लालमनशर्मा इत्यनेन उक्तं यत् क्षेत्रे एतादृशः वातगोलः प्राप्तः इति क्षेत्रस्य प्रमुखेन सूचितम्। तदनन्तरं पुलिस तत्स्थानं प्राप्य वातगोलः निग्रहे गृहीतः।

# अमृतसरे दशदिवसीय-संस्कृतसम्भाषण-शिबिरकार्यशालायाः समापनम्



श्रीलक्ष्मीनारायण- आयुर्वैदिक- महाविद्यालयः अमृतसर एवञ्च संस्कृतभारती पञ्जाबप्रान्त पक्षतः आयोजिता दशदिवसीय-संस्कृतसम्भाषण- शिबिरकार्यशालायाः समापनं जातम्। समापनकार्यक्रमस्य शुभारम्भः अतिथिभिः दीपप्रज्वलनेन दीपमन्त्रेण च जातम्। कार्यक्रमे छात्रैभ्यः धन्वन्तरिवन्दना, स्वागतगीतम्, समूहगीतम्, स्वानुभवः, आयुर्वैदिकनाटकम् इत्यादयः प्रस्तुत्यः कृतः। डॉ. विक्रान्तशर्मा संस्कृतविभागस्य आचार्यः कार्यक्रमे ये अतिथयः आसन् तेषां सर्वेषां परिचयं कारितवान्। अस्मिन् कार्यक्रमे मुख्यातिथिरूपेण डॉ. वीरेन्द्रकुमारः संस्कृतभारती, पञ्जाबप्रान्ताध्यक्षवर्यः आसीत्। महोदयः 'आयुर्वैदिक जनानां कृते संस्कृतं किमर्थम् आवश्यकम्' इति विषय उक्तम्। ये छात्राः आयुर्वेदं पठन्ति ते नूतनानाम् औषधिनां निर्माणमपि कर्तुं शक्नुवन्ति। 'शस्त्रधारकं शास्त्रधारकं' इति सूक्त्याः उपरि महोदयः बोधितवान्। मुख्यवक्तारूपेण संस्कृतभारत्याः विभागसंयोजकः डॉ. ओमनदीपः आसीत्। महोदयः आयुर्वेदशब्दस्य अर्थविषये बोधितवान्। आयुर्वेदमपि संस्कृतस्य विषयः एव अस्ति। एतदर्थं संस्कृतं पठामः, संस्कृतं पाठयामः इति। अस्मिन्नेव कार्यक्रमे अतिथिरूपेण संस्कृतभारत्याः प्रान्त सहमन्त्री अजयकुमार आर्यः अपि उपस्थितः आसीत्। प्राचार्या डॉ. मीनाक्षी अरोड़ा महोदयया आगतानाम् अतिथिनाम् उपहारेण स्वागतं कृतम्। प्राचार्या महोदया स्वोद्बोधने उक्तवती यत् संस्कृतं विना आयुर्वेदं न पठितुं शक्नुमः। अस्माकं महाविद्यालये एतादृशी कार्यशाला भविष्ये अपि भविष्यति। महाविद्यालयस्य पक्षतः सर्वे रजनी विस्तारिकां सम्मानितः कृतः। कार्यक्रमे विभिन्नाः प्रस्तुत्यः छात्रैः छात्राभिश्च कृताः। कार्यक्रमेऽस्मिन् डॉ. रीमा, डॉ. वीनस, डॉ. तन्वी, डॉ. भानू, डॉ. नूतन, डॉ. रेनू, डॉ. कुंजेश, डॉ. प्राञ्जलि, डॉ. मनप्रीत उपस्थिताः आसन्। विभागाध्यक्षा डॉ. वीनू मल्होत्रा महोदया सर्वेषां धन्यवादं ज्ञापवती। कार्यक्रमेऽस्मिन् १०० जनाः आसन्।

# स्नातकोत्तरविभागेन पोषणपखवटस्य समापनसमारोहः सुसम्पन्नः




**हिमसंस्कृतवार्ता:- दरभङ्गा।** कामेश्वरसिंह- दरभङ्गा- संस्कृत- विश्वविद्यालयस्य स्नातकोत्तरविभागेन आयोज्य पोषणपखवटस्य समापनसमारोहः सुष्ठु सम्पन्नः। कार्यक्रमस्य अध्यक्षता धर्मशास्त्रविभागाध्यक्षेन प्रो. दिलीपकुमारझावर्येण कृतम्। कार्यक्रमस्य संचालनं राष्ट्रीयसेवायोजनसमन्वयकेन डॉ. सुधीरकुमारझावर्येण निर्देशनमवलम्ब्य सम्पन्नम्। ते अवदन् यत् अस्याः अन्तराले विविधाः कार्यक्रमाः आयोजिताः। अध्यक्षस्थानं समालम्ब्य प्रो. दिलीपकुमारझा समस्तसमीपवर्तिभ्यः अभिनन्दनं कृतवान्। सः अवदत्- "दीर्घायुषः साधनम्, उत्तमं पोषणं च अनिवार्यं। भारते पारम्परिकजीवनम् एव स्वास्थ्यवर्धकम् आसीत्। अतः विदेशीयपदार्थानां सेवनं न्यूनतमं कृत्वा देशीयाहारस्य ग्रहणमेव स्वास्थ्यरक्षणस्य श्रेष्ठोपायः।" अस्मिन्नवसरे कुलानुशासकः प्रो. पुरेन्द्रबारिकः अवदत्— "स्वस्थसमाजनिर्माणे पोषणस्य अतिविशिष्टं स्थानम् अस्ति।" दर्शनविभागाध्यक्षः डॉ. धीरजकुमारपाण्डेयः अवदत्- "शिशुषु प्रारम्भे एव पोषणविषये जागरूकता अनिवार्या।" उपकुलसचिवः डॉ. दीननाथसाहः अवदत्- "पोषणं जीवनस्य आधारः अस्ति, तस्मात् अस्य उपेक्षा न कर्तव्या।" उपकुलसचिवः डॉ. सुनीलझः अवदत्- "सन्तुलिताहारः शरीरस्य च मनसः च स्वास्थ्याय आवश्यकः।" विधिपदधिकारी डॉ. नवीनकुमारझः अवदत्- "पोषणम् अधिकाररूपेण, कर्तव्यरूपेण च स्वीकर्तव्यम्।" साहित्यविभागाध्यक्षः (प्रभारी) डॉ. सन्तोषकुमारपास्वानः अवदत्- "स्वस्थं शरीरं सृजनात्मकतायाः आधारः।" कार्यक्रमे रोहितः पोषणविषये गीतं प्रस्तुतवान्। चन्दनः, सुनीलः, गुञ्जनः च अपि स्वैप्रस्तुतिभिः पोषणजागरूकतायाः संदेशं प्रदत्तवन्तः। स्पर्धायां विविधप्रस्तुतीनां मूल्याङ्कनं कृतम्, यत्र काजलः प्रथमस्थानं, चन्द्रमोहनः द्वितीयस्थानम्, अभिनवमिश्रः तृतीयस्थानं च प्राप्तवन्तः। निर्णायकमण्डले दर्शनविभागात् मायाकुमारी, ज्योतिषविभागात् डॉ. अवधेशकुमारश्रोत्रीयः, व्याकरणविभागात् च डॉ. यदुवीरस्वरूपशास्त्री च सम्मिलिताः आसन्। प्रतिवेदनं प्रस्तुत्य कार्यक्रमपदाधिकारी डॉ. साधनाशर्मा अवदत् यत् अस्मिन् कार्यक्रमे द्वादश प्रतिभागिनः सम्मिलिताः। तया उक्तम् यत् विविधस्पर्धानां सफलम् आयोजनं जातम्, यत्र 'महिलामञ्चस्य' विशेषं सहयोगं प्राप्तम्। अस्य कार्यक्रमस्य सूचना विश्वविद्यालयस्य जनसम्पर्काधिकारिणा डॉ. निशिकान्तसिंहेवर्येण प्रकाशिता।

# शिक्षकप्रशिक्षणकेंद्रेण राष्ट्रीयनवशिक्षानीतिविषयकेन्द्रितः अभिमुखीकरणकार्यक्रमः आयोज्यते



हिमसंस्कृतवार्ताः कुलदीपमैन्दोला। देशस्य उच्चशिक्षासंस्थासु सेवार्थं शिक्षकाणां प्रशिक्षणार्थं विश्वविद्यालयानुदानायोगस्य अधीनं "मालवीय- मिशन्-शिक्षकप्रशिक्षण-केन्द्रं" इत्यस्मिन् हेमवतीनन्दनगढ़वालविश्वविद्यालये, श्रीनगरगढ़वाले, उत्तराखण्डराज्ये, २२ एप्रिल् २०२५ दिनांकतः ३ मई २०२५ दिनांकपर्यन्तं अन्तर्जालमाध्यमेन राष्ट्रीयशिक्षानीतिः २०२० इत्यस्मिन् केन्द्रितः अभिमुखीकरणकार्यक्रमः आयोज्यते।केंद्रस्य कार्यवाहकनिदेशकः डॉ. राहुलकुंवरसिंहेन उक्तं यत् अस्मिन् कार्यक्रमे चतुर्षु राज्येषु स्थितानां त्रिंशत् शिक्षकाणां सहभागिता भविष्यति। ते सम्यक् प्रकारेण देशस्य प्रख्यातविद्वद्भिः द्विसप्ताहपर्यन्तं चतुर्विंशतिः घण्टासु प्रशिक्षिताः भविष्यन्ति।एवंविधाः कार्यक्रमाः अद्यतनकाले विश्वविद्यालयानुदानायोगस्य प्राथमिकतायाः अन्तर्गतं सन्ति। प्रशिक्षिताः शिक्षकाः राष्ट्रीयनवशिक्षानीतिं प्रभावपूर्वकं कार्यरूपेण स्थापनाय महत्त्वपूर्णं योगदानं कुर्वन्ति।अतः एतेषां कार्यक्रमाणां माध्यमेन शिक्षकेभ्यः शैक्षिकनेतृत्वम्, सर्वाङ्गीणविकासः, छात्रविविधता, शोधविकासः, उच्चशिक्षा-सामाजिकसंबन्धः, कौशलविकासः, सूचना-संवादप्रौद्योगिकी चेत्यादिभारतीयज्ञानपरम्परायाः विषये जागरूकता दीयते।कार्यक्रमस्य आयोजनसमये विश्वविद्यालयस्य कुलपतिः प्रो. एम. एम. एस. रौथाणेन हर्षं व्यक्तं कृत्वा केंद्रं प्रति शुभकामनाः दत्ताः।कार्यक्रमे मालवीयकेंद्रस्य सह-निदेशकः डॉ. सोमेशथपलियालः सर्वेषां स्वागतं कृत्वा संचालनं च अकरोत्। कार्यक्रमस्य अधिशासी डॉ. कविता भट्टवर्या आयोजनकार्ये साहाय्यं कृतवती। पूनमरावतः च अनिलकठैतः च अपि सहयोगं कृतवन्तौ।

# प्रशासनेन विमानसेवाभ्यः निर्देशः प्रदत्तः यत् वायुक्षेत्राणां प्रबन्धानां मध्ये यात्रिणः नियन्त्रणोपायान् सुनिश्चतुं यात्रिणां सौविध्यं-सुरक्षा-विनियामकानुपालानानां सुनिश्चितता भवेत्




प्रशासनेन विमानसेवाभ्यः निर्देशः प्रदत्तः यत् वायुक्षेत्राणां प्रबन्धानां मध्ये यात्रिणः नियन्त्रणोपायान् सुनिश्चेतुं यात्रिणां सौविध्य-सुरक्षा-विनियामका-नुपालानानां सुनिश्चितता भवेत्। नागरिकोड्डुयन मन्त्रालयेन उक्तं यत् सद्यः एव अन्ताराष्ट्रिय वायुक्षेत्रस्य पिधानानन्तरं अत्योड्डुयन-प्रतिबन्धानां च आलोके अनेकेषु उड्डुयनमार्गेषु महत्वपूर्णं परिवर्तनं कृतमस्ति। येन उड्डुयनावधिः विस्तृतः अभवत्, तकनीक्यावरोधस्य अपि सम्भावना विद्यते। मन्त्रालयेन उक्तं यत् कस्यापि अवरोधस्य विषये तत्क्षणमेव सूचयन्तु अपि च विमानेषु सर्वविध-आवश्यक-व्यवस्थाः कुर्वन्तु ।

# "विनोदकणिका"




{१} **प्रतिवेशिनी-** भवत्या चलवाणी उत्तमा अस्ति।
पत्नी- मम भ्राता दत्तवान्। मूल्यं चत्वारिंशत्सहस्र-रूप्यकाणि अस्ति।
**प्रतिवेशिनी-** भवत्या ग्रैवेयकम् अपि उत्तमम् अस्ति।
पत्नी- पतिः क्रीत्वा दत्तवान्। अस्य मूल्यम् सार्धलक्षरुप्यकाणि अस्ति।
प्रतिवेशिनी- भवत्या पतिः अपि उत्तमः अस्ति।
पत्नी- मम पिता अक्रीणत्। अस्य मूल्यं चत्वारिंशत्-लक्षरुप्यकाणि अस्ति। 🤣 🤰 😄



{२} एकः वृद्धः मार्गे गच्छन् आकाशं प्रति पश्यन् आसीत्। तदा स्वयानेन गच्छन्त्याः महिलायाः यानस्य पुरतः वृद्धः आगच्छति। यानं स्थगयित्वा सा महिला अवदत्- भो पितामहः! यत्र गन्तुम् इच्छसि तत्र पश्य। अन्यथा यत्र पश्यन् असि तत्र गमिष्यसि।

**-डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

# बिलासपुरस्य उद्यानपालकः हरिमनशर्मा देशस्य दिल्लीनगरे पद्मश्रीपुरस्कारं प्राप्स्यति



बिलासपुरस्य प्रगतिशीलः उद्यानपालकः हरिमनशर्मा देशस्य राजधानी दिल्लीनगरे पद्मश्रीपुरस्कारं प्राप्स्यति। उष्णक्षेत्रे सेबस्य आविष्कारं कृत्वा बिलासपुरमण्डलस्य पनियाला-नगरस्य प्रगतिशीलः फल-उद्यानपालकः हरिमन् शर्मा इत्ययं 28 अप्रैल-दिनाङ्के राष्ट्रपतिना पद्मश्रीपुरस्कारेण सम्मानितः भविष्यति, तदर्थं गृहमन्त्रालयस्य निदेशकः पाण्डेयप्रदीपकुमारेन पत्रं प्रेषयित्वा हरिमनशर्मा इत्यस्मै सूचितम् अस्ति। पत्रे उक्तं यत् एप्रिल-मासस्य २८ दिनाङ्के सायं ६ वादने राष्ट्रपतिभवनस्य दरबार-भवने आयोजिते कार्यक्रमे एषः पुरस्कारः प्रदत्तः भविष्यति तथा च एप्रिल-मासस्य २९ दिनाङ्के राष्ट्रपतिभवनस्य अपि च प्रधानमन्त्रि-सङ्ग्रहालयस्य भ्रमणार्थं नेष्यति इति । गृहमन्त्रालयेन हरिमन् शर्मा इत्यस्मै निवासस्य, यात्रायाः च सुविधाः अपि प्रदत्ताः भविष्यन्ति । सः एकं अधिकं व्यक्तिं स्वेन सह नेतुं शक्नोति। हिमाचलस्य कृते अतीव गौरवस्य विषयः अस्ति यत् प्रथमवारं कृषक-उद्यानविदः पद्मश्री इव महत् पुरस्कारं प्राप्तुं गच्छति।

# कणका दी बढाई



ओआ भाई लगी पेई कणका दी बढाई
कल्ले तक जेड़ी हरी भरी थी
सारेयां खेतरां बिच खड़ी थी
लगादी अज्ज सुक्की सुकाई
ओआ भाई लगी पेई कणका दी बढाई l

शालू विकी टिंकू आए
रोटी खाह्वी खेता जो नठाए
सारी धुप्पा उप्पर पेई
कुसी दी बुआ मासी आई
ओआ भाई लगी पेई कणका दी बढाई l

पहाड़ीगल्लां
हिमसंस्कृतवार्ताः

पैल्लें सारी कणक बड्डी
रेटे बन्ने इक्की जगह छड्डी
संजा जो थ्रेसर लेआ सदाई
ओआ भाई लगी पेई कणका दी बढाई l

थ्रेसर सदया संजा था
सेह भ्यागा तक नी आया
बर्खा आई तरपाल ढकाया
धुप्पा पेई ठंडे दी बोतल मंगाई
ओआ भाई लगी पेई कणका दी बढाई l


अग्लिया राती बारा बजे थ्रेसर आया
हककां पाई पाई पिंड जगाया
सारेयां इक्की दुज्जे दी मदद कराई
असां भी अपणी कणक लेई गाई
ओआ भाई लगी पेई कणका दी बढाई l

**जीवन(जे के)**



डी ए वी व.मा.वि.
बिलासपुर हिमाचल प्रदेश
9882329696

# कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालये 'शास्त्रमन्थनम्'इति व्याख्यानमाला




**हिमसंस्कृतवार्ताप्रेरकः डा.निशिकान्तपाण्डेय**

नमाटि नलबारी, असमप्रदेशः। वेदान्तशास्त्रस्य अनुबन्धविषये डा. श्रीकर जी एन महोदयस्य उद्बोधनम्। कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालये 'शास्त्रमन्थनम्'इति व्याख्यानमालायाः प्रथमं व्याख्यानम् नलबाड़ी, २६ अप्रिल २०२५। कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयस्य सर्वदर्शनविभागेन सर्वदर्शनपरिषदा च संयुक्ततया आयोजितस्य 'शास्त्रमन्थनम्' इति नाम्नः कार्यक्रमस्य १०८ व्याख्यानमालासु प्रथमव्याख्यानम् अद्य आभासीयमाध्यमेन समुत्साहेन सुसम्पन्नम्। अस्मिन व्याख्यानसत्रे विश्वविद्यालयस्य अध्यापकानां विद्यार्थिनां शोधच्छात्राणां च समवेतः सङ्घातः। असमविश्वविद्यालयस्य, केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्य अगरतलास्थस्य च छात्राः सविशेषतया सम्मिलिताः।

प्रथमव्याख्यानस्य विषयः आसीत् — 'वेदान्तशास्त्रस्य अनुबन्धः'। अस्य विषयस्य विशदप्रस्तुतीकरणं केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरस्थेन सहायकाचार्येण डा. श्रीकर जी एन महोदयेन कृतम्। स्वव्याख्याने डा. श्रीकर महोदयः वेदान्तशास्त्रस्य अनुबन्धचतुष्टयस्य — विषयः, प्रयोजनम्, सम्बन्धः, अधिकारी च इत्येषां —गम्भीरमीमांसां कृतवान्। ते स्पष्टतया अवदन् यत् वेदान्तशास्त्रस्य विषयः ब्रह्मजीवयोः एकत्वस्वरूपम्, प्रयोजनम् मोक्षलाभः, सम्बन्धः जीवब्रह्मैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः, अधिकारी च सः साधकः, यः विवेकवैराग्यषट्सम्पत्तिमुमुक्षुत्वं च धारयति। ते श्रोतृभ्यः शास्त्रसन्दर्भैः, दृष्टान्तैः च अनुबन्धचतुष्टयस्य महत्त्वं स्पष्टीकृत्य उक्तवन्तः यत् वेदान्तस्य गूढतत्त्वेषु प्रवेशस्य मूलोपायः एष एव।

कार्यक्रमस्य अध्यक्षतां विश्वविद्यालयस्य कुलगुरुः आचार्यः प्रह्लाद रा. जोशी महोदयः वहनं कृतवान्। स्वीयम् अध्यक्षीयभाषणम् आरभ्य सः अवदत् — "शास्त्राध्ययनं केवलं बौद्धिकविलासः न, अपि तु साधनामूलकं आध्यात्मिकमार्गानुसरणम् अस्ति। अनुबन्धचतुष्टयस्य ज्ञानं तस्मिन्नध्ययने प्रथमं सोपानम्।" कार्यक्रमस्य आरम्भः शोधच्छात्रेण लिराजकाफ्ले महाभागेन मंगलाचरणेन सम्पन्नः, येन सम्पूर्णं वातावरणं भक्तिभावेन पूरितम्। कार्यक्रमस्य संचालनं वक्त्रपरिचयं च पूर्वछात्रया जिमि डेका महाभगया कुशलतया सम्पादितम्। सर्वदर्शनविभागाध्यक्षः डा. रणजीत कुमार तिवारी महोदयः सम्यक् नेतृत्वेन कार्यक्रमस्य यथासमयसंयोजनम् अकरोत्। समापनसमये छात्रसमूहः व्याख्यानस्य लाभप्रदत्वेन आयोजकेभ्यः वक्त्रे च हार्दं कृतज्ञतां निवेदितवान्। 'शास्त्रमन्थन' व्याख्यानमालायाः प्रमुखं लक्ष्यं शास्त्रचिन्तनपरम्परायाः संवर्धनम्, नवीनपीढ्यां प्रति शास्त्राध्ययनरुचेरुत्पादनं च अस्ति। आगामिषु व्याख्यानक्रमेषु विशेषोत्साहः विश्वविद्यालयपरिवारस्य मध्ये दृश्यते।